स्कंद वेदपाद स्तवः

स्कंद वेदपाद स्तवः

यो देवानां पुरो दित्सुरर्थिभ्यो वरमीप्सितं |
अग्रे स्थितः स विघ्नेशो ममांतर्हृदये स्थितः || 1 ||

महः पुरा वै बुधसैंधवश्री-
-शराटवीमध्यगतं हृदंतः |
श्रीकंठफालेक्षणजातमीडे
तत्पुष्करस्यायतनाद्धि जातं || 2 ||

महो गुहाख्यं निगमांतपंक्ति
मृग्यांघ्रिपंकेरुहयुग्ममीडे |
सांबो वृषस्थः सुतदर्शनोत्को
यत्पर्यपश्यत्सरिरस्य मध्ये || 3 ||

त्वामेव देवं शिवफालनेत्र-
-महोविवर्तं परमात्मरूपं |
तिष्ठन् व्रजन् जाग्रदहं शयानः
प्राणेन वाचा मनसा बिभर्मि || 4 ||

नमो भवानीतनुजाय तेऽस्तु
विज्ञाततत्त्वा मुनयः पुराणाः |
यमेव शंभुं हरिमब्जयोनिं
यमिंद्रमाहुर्वरुणं यमाहुः || 5 ||

कोटीरकोटिस्थमहार्घकोटि-
-मणिप्रभाजालवृतं गुहं त्वां |
अनन्यचेताः प्रणवाब्जहंसं
वेदाहमेतं पुरुषं महांतं || 6 ||

स नोऽवतु स्वालिकपंक्तिजीव-
-ग्रहं गृहीतायत चंद्रखंडः |
गुहादसीयंतमिदं स्वरूपं
परात्परं यन्महतो महांतं || 7 ||

स्वर्गापगामध्यगपुंडरीक-
-दलप्रभाजैत्रविलोचनस्य |
अक्ष्णां सहस्रेण विलोक्यमानं
न संदृशे तिष्ठति रूपमस्य || 8 ||

हेमद्विषत्कुंडलमंडलाढ्य-
-गंडस्थलीमंडिततुंडशोभः |
ब्रह्म त्वमेवेति गुहो मुनींद्रैः
हृदा मनीषा मनसाऽभिक्लप्तः || 9 ||

सुपक्वबिंबाधरकांतिरक्त-
-संध्यामृगांकायितदंतपंक्तिः |
गुहस्य नः पातु विलोलदृष्टिः
येनावृतं खं च दिवं महीं च || 10 ||

करींद्रशुंडायितदोःप्रकांड
द्विषट्ककेयूरविराजमानं |
गुहं मृडानीभवमप्रमेयं
न चक्षुषा पश्यति कश्चनैनं || 11 ||

स्वकीयदोर्दंडगृहीतचंड-
-कोदंड निर्मुक्त पृषत्कषंडैः |
त्रिविष्टपांधंकरणैरशून्यान्
यः सप्तलोकानकृणोद्दिशश्च || 12 ||

सौवर्णहारादिविभूषणोज्ज्वल-
-न्मणिप्रभालीढ विशालवक्षाः |
स्कंदः स मां पातु जिताब्जयोनिः
अजायमानो बहुधा विजायते || 13 ||

देवः स वैहारिकवेषधारी
लीलाकृताशेषजगद्विमर्दः |
शिखिध्वजः पातु भयंकरेभ्यो
यः सप्तसिंधूनदधात्पृथिव्यां || 14 ||

षडाननो द्वादशबाहुदंडः
श्रुत्यंतगामी द्विषडीक्षणाढ्यः |
भीताय मह्यं गिरिजातनूजो
हिरण्यवर्णस्त्वभयं कृणोतु || 15 ||

यो दानवानीकभयंकराटवी
समूलकोत्पाटनचंडवातः |
षाण्मातुरः संहृत सर्वशत्रुः
अथैकराजो ह्यभवज्जनानां || 16 ||

अतीव बालः प्रवयाः कुमारो
वर्णी युवा षण्मुख एकवक्त्रः |
इत्थं महस्तद्बहुधाऽऽविरासी-
-द्यदेकमव्यक्तमनंतरूपं || 17 ||

यदीयमायावरणाख्यशक्ति
तिरोहितांतः करणा हि मूढाः |
न जानते त्वां गुह तं प्रपद्ये
परेण नाकं निहितं गुहायां || 18 ||

गुरूपदेशाधिगतेन योग-
-मार्गेण संप्राप्य च योगिनस्त्वां |
गुहं परं ब्रह्म हृदंबुजस्थं
विभ्राजदेतद्यतयो विशंति || 19 ||

यो देवसेनापतिरादराद्वै
ब्रह्मादिभिर्देवगणैरभिष्टुतः |
तं देवसेनान्यमहं प्रपद्ये
विश्वं पुराणं तमसः परस्तात् || 20 ||

हृदंबुजांतर्दहराग्रवर्ति
कृशानुमध्यस्थपरात्मरूपात् |
गुहात्सुसूक्ष्मान्मुनयः प्रतीयु-
-रतः परं नान्यदणीयसं हि || 21 ||

तपः प्रसन्नेशबहुप्रदत्त-
-वरप्रमत्तासुरभीतिभाजां |
सुपर्वणां स्कंद भवान् शरण्यः
इंद्रस्य विष्णोर्वरुणस्य राज्ञः || 22 ||

स एव देवो गिरिजाकुमारो
राजा स मित्रं स हि नो वरेण्यः |
भ्राता स बंधुः स गुरुः स्वसा च
स एव पुत्रः स पिता च माता || 23 ||

स्वराज्यदात्रे स्वसुतां वितीर्य
तां देवसेनां सुकुमारगात्रां |
आराधयत्यन्वहमांबिकेयं
इंद्रो हविष्मान्सगणो मरुद्भिः || 24 ||

देवेन येनालघुविक्रमेण
हतेषु सर्वेष्वपि दानवेषु |
पुरेव देवाः स्वपदेऽधिचक्रुः
इंद्रश्च सम्राड्वरुणश्च राजा || 25 ||

षाण्मातुरोऽसौ जगतां शरण्य-
-स्तेजोऽन्नमापः पवनश्च भूत्वा |
संरक्षणायैव जगत्सु देवो
विवेश भूतानि चराचराणि || 26 ||

करौ युवामंजलिमेव नित्यं
उमांगजाताय विधत्तमस्मै |
एष प्रसन्नः सुकुमारमूर्ति-
-रस्मासु देवो द्रविणं दधातु || 27 ||

निधिः कलानामुदधिर्दयानां
पतिर्जनानां सरणिर्मुनीनां |
कदा प्रसीदेन्मयि पार्वतेयः
पिता विराजामृषभो रयीणां || 28 ||

सौंदर्यवल्लीतनुसौकुमार्य-
-सरोजपुष्पंधयमानसो यः |
चचार कांतारपथेषु देवः
स नो ददातु द्रविणं सुवीर्यं || 29 ||

इतोऽपि सौंदर्यवदस्तु देह-
-मितीव हुत्वा शिवफालनेत्रे |
जातस्ततः किं स कुमार एव
कामस्तदग्रे समवर्ततादि || 30 ||

मुमुक्षुलोकाः शृणुत प्रियं वो
भजध्वमेनं गिरिजाकुमारं |
अस्यैव देवस्य परात्मतेति
हृदि प्रतीष्या कवयो मनीषा || 31 ||

धेनुर्बह्वीः कामदोग्ध्रीः सुवत्साः
कुंडोध्नीर्गा देहि नस्त्वं सहस्रं |
भक्तार्तिघ्नं देवदेवं षडास्यं
विद्माहि त्वा गोपतिं शूरगोनां || 32 ||

वंदामहे बर्हिणवाहनस्थितं
वनीपकाशेषमनीषितप्रदं |
तोष्टूयमानं बहुधा पदे पदे
संक्रंदनेनानिमिषेण जिष्णुना || 33 ||

दिग्भ्यो दशभ्यः परितः पुनः पुनः
परः शतायातसिषेविषावतां |
अनुग्रहायैव षडाननो ह्यसौ
प्रत्यंग्मुखस्तिष्ठति विश्वतोमुखः || 34 ||

कूर्मः फणींद्रश्च तथा फणाभृतो
दिग्दंतिनश्चैव कुलाचला अपि |
भूत्वाऽंबिकेयः प्रथितः प्रतापवान्
ब्रह्माध्यतिष्ठद्भुवनानि धारयन् || 35 ||

यो वै स्कंदः पृष्टः शंभोः सत्यं ज्ञानं ब्रह्माद्वैतं |
ओंकारार्थं प्राह स्मेत्थं सुब्रह्मण्यों सुब्रह्मण्यों || 36 ||

यो जाह्नवीशरारण्यह्रदांभोजे बभौ पुरा |
तस्मै नमः षण्मुखाय महासेनाय धीमहि || 37 ||

यद्दक्षिणकरांभोजमिष्टदं स्वानुजीविनां |
तेभ्य इंद्रादिसेनानां सेनानिभ्यश्च वो नमः || 38 ||

देवतानामृषीणां च भक्तानामपि योगिनां |
भूतानामपि वीराणां पतीनां पतये नमः || 39 ||

नमस्तेऽस्तु महेशान भीतेभ्यः शूरपद्मनः |
सुनासीरमुखेभ्यस्त्वं स्वस्तिदा अभयंकरः || 40 ||

कटाक्षवीक्षणापास्त निखिलव्याधिबंधन |
देवसेनापते स्वामिन् अभि त्वा शूर नूनुमः || 41 ||

अंतश्चरसि भूतेषु त्वमेकः सूक्ष्मरूपतः |
त्वमेव निगमांतेषु परमात्मा व्यवस्थितः || 42 ||

मही द्यौरंतरिक्षं च वायुरापोऽनलोऽंबरं |
सुब्रह्मण्य जगन्नाथ त्वयि सर्वं प्रतिष्ठितं || 43 ||

शैशवे त्वं महासेन बंदीकृत्य प्रजापतिं |
अस्राक्षीस्तान्यथापूर्वं मनुष्याः पशवश्च ये || 44 ||

वेदांतकंदरीवर्ति गुहाशयषडानने |
त्रिलोकीयं त्वयि विभो नावीवांतः समाहिता || 45 ||

कला मुहूर्ताः काष्ठाश्च मासा वर्षा युगानि च |
त्वयि वल्लीश निहिता निमेषास्त्रुटिभिः सह || 46 ||

रोगकांतारदावाग्ने मृत्युकक्षहुताशन |
शूरघ्न त्वत्प्रतापेन रेजती रोदसी उभे || 47 ||

परं ब्रह्म विचिन्वंतो हृदयांभोजमध्यगं |
योगिनो नारदाद्यास्त्वां सदा पश्यंति सूरयः || 48 ||

हतशूरमुखाशेषदैतेयं त्वां गुहास्तुवन् |
अग्नाविष्णू चेंद्रवायू सोमो धाता बृहस्पतिः || 49 ||

वाचालयस्यवाचं त्वं सचक्षुः कुरुषेऽदृशं |
आश्रितेभ्यो जगन्नाथ शिवो नः सुमना भव || 50 ||

स एव जगतः कर्ता भर्ता हर्ता जगद्गुरुः |
कुमारः सच्चिदानंदः सोऽक्षरः परमः स्वराट् || 51 ||

असुरान् शूरपद्मादीन् हत्वा शरवणोद्भवः |
देवान् स्वस्वपदे कृत्वा सम्राडेको विराजसि || 52 ||

तव दृष्ट्वा विश्वरूपं सहर्षभयवेपथु |
त्वामस्तुवन्नादितेयाः बृहस्पतिपुरोहिताः || 53 ||

किन्नरा गरुडा नागा यक्षाः साध्या मरुद्गणाः |
ऐंद्रीशं त्वामहरहः विश्वे देवा उपासते || 54 ||

विश्वासान्मानुषीणां च प्रजानां पशुपक्षिणां |
चराचराणां जगतां ध्रुवो राजा विशामयं || 55 ||

अंभोजसंवर्तिकासु राजहंसा इव प्रभो |
मदीयहृदयांभोजे ध्रुवस्तिष्ठाविचाचलिः || 56 ||

लीलामात्रकृताशेषभुवनाद्गिरिजासुतात् |
अथर्व चाथ ऋक्साम यजुस्तस्मादजायत || 57 ||

तिले तैलमिव प्रोतं दध्न्याज्यमिव षण्मुखे |
मणौ सूत्रमिव स्यूतं ब्रह्म विश्वमिदं जगत् || 58 ||

यस्तप्तादीनृषीन् शापादुद्दधार हरात्मजः |
मातुः स्तनसुधापूरे पुत्रः प्रमुदितोधयन् || 59 ||

इज्यया पूजया स्तुत्या भक्त्या च परिचर्यया |
ध्यानेन तपसा च त्वां देवं मनसि ईडते || 60 ||

श्रुतिस्मृत्यागमाद्युक्तकर्मणां फलदायिने |
स्कंदाय तुभ्यं मखिभिः श्रद्धया हूयते हविः || 61 ||

मूर्धा द्यौरंबरं नाभिरूरू भूरतलं पदे |
षण्मुखस्येत्येवमाहुः अंतर्विश्वमिदं जगत् || 62 ||

भक्तसंतापशमन प्रावृषेण्यघनाघनात् |
स्कंदादन्यं मनो मागाः स दृष्टो मृडयाति नः || 63 ||

जिह्वे त्वमुच्चैर्निस्तंद्रा रात्रिंदिवमभिष्टुहि |
देवसेनं महासेनं अदुग्धा इव धेनवः || 64 ||

अकलंकशरच्चंद्रविलसत्त्वन्मुखस्रुताः |
मंदस्मितसुधाधारास्ता मे कृण्वंतु भेषजं || 65 ||

देवानीजिमहे पूर्वं तपश्चकृमहे पुरा |
यद्गुहो देवतास्माकं कविर्गृहपतिर्युवा || 66 ||

मदीयहृदयांभोजनिर्यूहमणिमंचके |
षडानन त्वत्पादः स्यादियान् प्रादेशसम्मितः || 67 ||

चिरंतनवचः स्तुत्यः प्रणवांबुजषट्पदः |
करोतु देवसेनेशः शिवा नः प्रदिशो दिशः || 68 ||

दैतेयवधसन्नद्धो भवान् पवनसारथिः |
द्विलक्षमर्वतो हैमे रथे युक्त्वाऽधितिष्ठति || 69 ||

गगनोच्छ्रितकोदंडकिरीटं शूरमाहवे |
बिभेदिथ त्वं नाराचैः सहस्रेण शतेन च || 70 ||

ऐशाल्ललाटनयनात् जातं वह्निर्यथाऽरणेः |
मुमुक्षवो गुहं ब्रह्म विचिन्वंतु मनीषया || 71 ||

हिरण्यज्योतिषं स्कंदं याचध्वं भो वनीपकाः |
एषोऽर्थिनः पूरयति प्रजया च धनेन च || 72 ||

सन्निधास्यति किं स्वामी भवनांबुरुहेक्षणः |
तावकं मंजुलं रूपं स्मर्यते न च दृश्यते || 73 ||

यतस्त्वं जगतामेषां आशिषे शिखिवाहन |
ततो देहि बहून्व्रीहीनकृष्टा ये च कृष्टजाः || 74 ||

धनधान्यगृहान् पुत्रान् देहि देव दयानिधे |
त्वमाश्रितेष्टद इति कर्णाभ्यां भूरि विश्रुतं || 75 ||

भक्तेभ्यो मुचुकुंदाख्यप्रमुखेभ्यो यथा गुह |
प्रादास्तथा देहि मह्यमच्युतां बहुलां श्रियं || 76 ||

भक्तान् तत्पुत्रसुहृदः तन्मातृपितृसोदरान् |
पाहि स्कंद पुनश्चास्य द्विपदो ये चतुष्पदः || 77 ||

चोरव्याघ्रपिशाचाखुसर्पकीटादिबाधकात् |
भक्तान्निशासु संरक्षन् त्रिषु लोकेषु जागृहि || 78 ||

दानवेष्वपि दैत्येषु राक्षसेष्वप्यरातिषु |
पिशाचेष्वपि गांगेय विक्रमस्व महानसि || 79 ||

आधिभिर्व्याधिभिश्चैव पीडितानामहर्निशं |
दूतानां वपुषि स्वामिन्नासुवोर्जमिषं च नः || 80 ||

अतितीव्रेण तपसा तप्यमाना अहर्निशं |
उपासत त्वां तप्ताद्याः अथ हैनं पुरर्षयः || 81 ||

ध्यानावाहनपूजेज्यापरिचर्यास्तुतिष्वहं |
अज्ञो मे सफलां पूजां कृणुहि ब्रह्मणस्पते || 82 ||

असुरान् राक्षसान् क्रूरान् देवयज्ञविघातकान् |
जहि देवेश यस्मात्त्वं रक्षोहामीवचातनः || 83 ||

दुर्वृत्तेभ्यो धनं धत्से नीचेभ्योऽपि धनं बहु |
न ददासि कुतो मह्यं एतत्पृच्छामि संप्रति || 84 ||

मुखैरेतान्महारौद्रान् दूरीकुरु जगत्पते |
मम स्वमभिकांक्षंते ये स्तेना ये च तस्कराः || 85 ||

गुह त्वत्पादभक्तानां गेहे जाग्रत्वहर्दिवं |
वीरबाहुमुखा वीर ते नित्यानुचरास्तव || 86 ||

त्रिषड्विलोचनेष्वेकदृक्कटाक्षेण लक्षयन् |
आढ्यं करोतु मां स्कंदः पर्जन्यो वृष्टिमानिव || 87 ||

भयानकासुरानीककांदिशीकाः पुरा खलु |
गुह त्वां शरणं प्रापुः इंद्रेण सह देवताः || 88 ||

त्वामेव कीर्तयन् देव ध्यायन् शृण्वन् प्रपूजयन् |
गुह त्वत्पादभक्तोऽहं जीवानि शरदः शतं || 89 ||

कृपादुग्धाब्धिकल्लोलायमानापांगवीक्षण |
देहि मे गुह बह्वायुर्दीर्घायुस्त्वमिहेशिषे || 90 ||

पुरारातीक्षणपयः पारावारसुधाकर |
षड्वक्त्र धेहि कृपया मयि मेधां मयि प्रजां || 91 ||

भक्तचातकबृंदेष्टवर्षिधाराधर प्रभो |
अस्मान् संजीवय स्वामिनस्मिन् लोके शतं समाः || 92 ||

भीता वयं महासेन पथि दुर्गे वने यतः |
चोरव्याघ्रपिशाचेभ्यः ततो नो अभयं कृधि || 93 ||

व्याधयः शूलकुष्ठार्शः प्रमेहाद्या यतः सदा |
पीडयंति पिशाचाद्याः ततो नो धेहि भेषजं || 94 ||

त्वदीयपादकमलध्यानवर्मितविग्रहान् |
कुहका मोहकाः क्षुद्राः माऽस्मान्प्रापन्नरातयः || 95 ||

धनधान्यपशुक्षेत्रबलेष्वस्मदपेक्षया |
देवसेनापतेऽस्माकं अधरे संतु शत्रवः || 96 ||

अरातिकुलनिर्मूलनालंकर्मीणविक्रम |
अकारणेन बहुधा यो नो द्वेष्टि स रिष्यतु || 97 ||

मंत्रैर्यंत्रैस्तथा तंत्रैरौषधैरायुधैरपि |
जिघांसति च योऽस्मान् स द्विषन्मे बहु शोचतु || 98 ||

आखंडलारीनसुरान् त्वं तु स्पर्धावतो यथा |
जहि गांगेय तौ मर्त्यौ यं चाहं द्वेष्टि यश्च मां || 99 ||

त्वन्नामकीर्तनपरक्षेमंकरकरांबुज |
तमिमं संहर स्वामिन् यश्च नो द्वेषते जनः || 100 ||

दूरेऽंतिके वा यः शत्रुः अस्माननपराधिनः |
शपत्येनं जहि स्कंद यश्च नः शपतः शपात् || 101 ||

चक्षुषा मनसा वाचा मंत्रेण हवनेन च |
तत्कृत्यां नाशय स्वामिन् भ्रातृव्यस्याभिदासतः || 102 ||

मच्छिद्रान्वेषिणः शत्रोः धनमायुः प्रजाः पशून् |
सर्वान्नाशय शूरघ्न मा तस्योच्छेषि किंचन || 103 ||

अविद्वांसश्च विद्वांसः स्वप्ने जाग्रति वा गुह |
तेभ्यो मोचय मां यद्यदेनांसि चकृमा वयं || 104 ||

वयमूचिम यद्देव जिह्वया देवहेलनं |
एनसो मोचयाग्नेय त्वं हि वेत्थ यथातथं || 105 ||

वित्तार्थं वा तथाऽन्यार्थं विप्रार्थं गोऽर्थमेव वा |
पुनीह्यस्मांस्ततः स्कंद यत्किंचानृतमूदिम || 106 ||

तमागसं क्षमस्व त्वं स्वकीयाभीष्टलिप्सया |
संप्रार्थ्य तुभ्यं वाऽन्यस्मै यद्वाचाऽनृतमूदिम || 107 ||

सौंदर्यवल्ल्या सहितं अंबया देवसेनया |
महासेनं भजे देवं सत्येन तपसा सह || 108 ||

यो वै पठेद्गुहस्यैनं वेदांतस्तवमादरात् |
स्कांदाः कटाक्षास्तस्योच्चैरायुः कीर्तिं प्रजां ददुः || 109 ||

स्कंदस्यैनं वेदपादस्तवं यो
भक्त्या नित्यं श्रावयेद्वा पठेद्वा |
भूयासुस्ते तस्य मर्त्यस्य शीघ्रं
ये ये कामा दुर्लभा मर्त्यलोके || 110 ||

इति स्कंदवेदपादस्तवः |